# ॥ श्रीचिन्तामणिदक्षिणामूर्तिस्तोत्रम् ॥

नतखेटनिशाटकिरीटतटीघटितोपलपाटलपीठतलम् ।
तटिदाभजटापटलीमकुटं वटमूलकुटीनिलयं कलये ॥

समरं खलु यच्चरणाम्बुजयोः भरणाय भवोत्तरणाय भवेत् ।
शरणं करुणानिलयं सुगुणं भज बालसुधाकिरणाभरणम् ॥

परिकीर्णसुवर्णसवर्णजटाभ्रमदभ्रसरिच्छरदभ्ररुचिः ।
मकुटे कुटिलं घटयन्शशिनं निटिलेऽनलदृग्जटिलो जयति ॥

वटभूजतटीघटितस्फटिकोपमकुट्टिमवेदितले विमले ।
स्मितफुल्लमुखं चिदुपात्तसुखं पुरवैरि महःकरवै हृदये ॥

अकलङ्कशशाङ्कसहस्रसहोदरदीधितिदीपितदिग्वलयम् ।
निगमागमनीरधिनिर्मथनोदितमाकलयाम्यमृतं किमपि ॥

विषभूषमपाकृतदोषचयं मुनिवेषविशेषमशेषगुरुम् ।
धृतचिन्मयमुद्रमहं कलये गतनिद्रममुद्रसमाधिविधौ ॥

धृढयोगभवानुभवोत्कलिकं प्रसरत्पुलकं क्रतुभुक्तिलकम् ।
भसितोल्लसितालिकविस्फुरितानलदृक्तिलकं कलितेन्दुशिखम् ॥

वद चित्त किमात्तमभूद्भवता भ्रमता बहुधा किल दिक्षु मुदा ।
निजशर्मकरं कुरु कर्म परं भवमेव भवापहमाकलय ॥

वरपुस्तकहस्तमपास्ततमः श्रुतिमस्तकशस्तसमस्तगुणम् ।
मम निस्तुलवस्तु पुरोऽस्तु परं प्रणवप्रवशप्रवरानुगतम् ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]